योगवासिष्ठः/प्रकरणम् २ (मुमुक्षुव्यवहारप्रकरणम्)/सर्गः १४

< योगवासिष्ठः | प्रकरणम् २ (मुमुक्षुव्यवहारप्रकरणम्)

चतुर्दशः सर्गः १४

श्रीवसिष्ठ उवाच ।

शास्त्रावबोधामलया धिया परमपूतया ।

कर्तव्यः कारणज्ञेन विचारोऽनिशमात्मनः ।। १

विचारात्तीक्ष्णतामेत्य धीः पश्यति परं पदम् ।

दीर्घसंसाररोगस्य विचारो हि महौषधम् ।। २

आपद्वनमनन्तेहापरिपल्लविताकृति ।

विचारक्रकचच्छिन्नं नैव भूयः प्ररोहति ।। ३

मोहेन बन्धुनाशेषु संकटेषु शमेषु च ।

सर्वं व्याप्तं महाप्राज्ञ विचारो हि सतां गतिः ।। ४

न विचारं विना कश्चिदुपायोऽस्ति विपश्चिताम् ।

विचारादशुभं त्यक्त्वा शुभमायाति धीः सताम् ।। ५

बलं बुद्धिश्च तेजश्च प्रतिपत्तिः क्रियाफलम् ।

फलन्त्येतानि सर्वाणि विचारेणैव धीमताम् ।। ६

युक्तायुक्तमहादीपमभिवाञ्छितसाधकम् ।

स्फारं विचारमाश्रित्य संसारजलधिं तरेत् ।। ७

आलूनहृदयाम्भोजान्महामोहमतङ्गजान् ।

विदारयति शुद्धात्मा विचारो नाम केसरी ।। ८

मूढाः कालवशेनेह यद्गताः परमं पदम् ।

तद्विचारप्रदीपस्य विजृम्भितमनुत्तमम् ।। ९

राज्यानि संपदः स्फारा भोगो मोक्षश्च शाश्वतः ।

विचारकल्पवृक्षस्य फलान्येतानि राघव ।। १०

या विवेकविकासिन्यो मतयो महतामिह ।

न ता विपदि मज्जन्ति तुम्बकानीव वारिणि ।। ११

विचारोदयकारिण्या धिया व्यवहरन्ति ये ।

फलानामत्युदाराणां भाजनं हि भवन्ति ते ।। १२

मूर्खहृत्काननस्थानामाशाप्रथमरोधिनाम् ।

अविचारकरञ्जानां मञ्जर्यो दुःखरीतयः ।। १३

कज्जलक्षोदमलिना मदिरामदधर्मिणी ।

अविचारमयी निद्रा यातु ते राघव क्षयम् ।। १४

महापदतिदीर्घेषु सद्विचारपरो नरः ।

न निमज्जति मोहेषु तेजोराशिस्तमःस्विव ।। १५

मानसे सरसि स्वच्छे विचारकमलोत्करः ।

नूनं विकसितो यस्य हिमवानिव भाति सः ।। १६

विचारविकला यस्य मतिर्मान्द्यमुपेयुषः ।

तस्योदेत्यशनिश्चन्द्रान्मुधा यक्षः शिशोरिव ।। १७

दुःखखण्डकमस्थूलं विपन्नवलतामधुः ।

राम दूरे परित्याज्यो निर्विवेको नराधमः ।। १८

ये केचन दुरारम्भा दुराचारा दुराधयः ।

अविचारेण ते भान्ति वेतालास्तमसा यथा ।। १९

अविचारिणमेकान्तवनद्रुमसधर्मकम् ।

अक्षमं साधुकार्येषु दूरे कुरु रघूद्वह ।। २०

विविक्तं हि मनो जन्तोराशावैवश्यवर्जितम् ।

परां निर्वृतिमभ्येति पूर्णचन्द्र इवात्मनि ।। २१

विवेकितोदिता देहे सर्वं शीतलयत्यलम् ।

अलंकरोति चात्यन्तं ज्योत्स्नेव भुवनं यथा ।। २२

परमार्थपताकाया धियो धवलचामरम् ।

विचारो राजते जन्तो रजन्यामिव चन्द्रमाः ।। २३

विचारचारवो जीवा भासयन्तो दिशो दश ।

भान्ति भास्करवन्नूनं भूयो भवभयापहाः ।। २४

बालस्य स्वमनोमोहकल्पितः प्राणहारकः ।

रात्रौ नभसि वेतालो विचारेण विलीयते ।। २५

सर्वं एव जगद्भावा अविचारेण चारवः ।

अविद्यमानसद्भावा विचारविशरारवः ।। २६

पुंसो निजमनोमोहकल्पितोऽनल्पदुःखदः ।

संसारचिरवेतालो विचारेण विलीयते ।। २७

समं सुखं निराबाधमनन्तमनपाश्रयम् ।

विद्धीमं केवलीभावं विचारोच्चतरोः फलम् ।। २८

अचलस्थितितोदारा प्रकटाभोगतेजसा ।

तेन निष्कामतोदेति शीततेवेन्दुनोदिता ।। २९

स्वविचारमहौषध्या साधुश्चित्तनिषण्णया ।

तयोत्तमत्वप्रदया नाभिवाञ्छति नोज्झति ।। ३०

तत्पदालम्बनं चेतः स्फारमाभासमागतम् ।

नास्तमेति न चोदेति खमिवातिततान्तरम् ।। ३१

न ददाति न चादत्ते न चोन्नमति शाम्यति ।

केवलं साक्षिवत्पश्यञ्जगदाभोगि तिष्ठति ।। ३२

न च शाम्यति नाप्यन्तर्नापि बाह्येऽवतिष्ठति ।

न च नैष्कर्म्यमादत्ते न च कर्मणि मज्जति ।। ३३

उपेक्षते गतं वस्तु संप्राप्तमनुवर्तते ।

न क्षुब्धो न च वाऽक्षुब्धो भाति पूर्ण इवार्णवः।। ३४

एवं पूर्णेन मनसा महात्मानो महाशयाः ।

जीवन्मुक्ता जगत्यस्मिन्विहरन्तीह योगिनः ।। ३५

उषित्वा सुचिरं कालं धीरास्ते यावदीप्सितम् ।

ते तमन्ते परित्यज्य यान्ति केवलतां तताम् ।। ३६

कोऽहं कस्य च संसार इत्यापद्यपि धीमता ।

चिन्तनीयं प्रयत्नेन सप्रतीकारमात्मना ।। ३७

कार्यसंकटसंदेहं राजा जानाति राघव ।

निष्फलं सफलं वापि विचारेणैव नान्यथा ।। ३८

वेदवेदान्तसिद्धान्तस्थितयः स्थितिकारणम् ।

निर्णीयन्ते विचारेण दीपेन च भुवो निशि ।। ३९

अनष्टमन्धकारेषु बहुतेजःस्वजिह्मितम् ।

पश्यत्यपि व्यवहितं विचारश्चारुलोचनम् ।। ४०

विवेकान्धो हि जात्यन्धः शोच्यः सर्वस्य दुर्मतिः ।

दिव्यचक्षुर्विवेकात्मा जयत्यखिलवस्तुषु ।। ४१

परमात्ममयी मान्या महानन्दैकसाधिनी ।

क्षणमेकं परित्याज्या न विचारचमत्कृतिः ।। ४२

विचारचारुपुरुषो महतामपि रोचते ।

परिपक्वचमत्कारं सहकारफलं यथा ।। ४३

विचारकान्तमतयो नानेकेषु पुनःपुनः ।

लुठन्ति दुःखश्वभ्रेषु ज्ञाताध्वगतयो नराः ।। ४४

नच रौति तथा रोगी नानर्थशतजर्जरः ।

अविचारविनष्टात्मा यथाऽज्ञः परिरोदिति ।। ४५

वरं कर्दममेकत्वं मलकीटकता वरम् ।

वरमन्धगुहाहित्वं न नरस्याविचारिता ।। ४६

सर्वानर्थनिजावासं सर्वसाधुतिरस्कृतम् । ।

सर्वदौस्थित्यसीमान्तमविचारं परित्यजेत् ।। ४७

नित्यं विचारयुक्तेन भवितव्यं महात्मना ।

तथान्धकूपे पततां विचारो ह्यवलम्बनम् ।। ४८

स्वयमेवात्मनात्मानमवष्टभ्य विचारतः ।

संसारमोहजलधेस्तारयेत्स्वमनोमृगम् ।। ४९

कोऽहं कथमयं दोषः संसाराख्य उपागतः ।

न्यायेनेति परामर्शो विचार इति कथ्यते ।। ५०

अन्धान्धमोहसुधनं चिरं दुःखाय केवलम् ।

कृतं शिलाया हृदयं दुर्मतेश्चाविचारिणः ।। ५१

भावाभावग्रहोत्सर्गदृशामिह हि राघव ।

न विचारादृते तत्त्वं ज्ञायते साधु किंचन ।। ५२

विचाराज्ज्ञायते तत्त्वं तत्त्वाद्विश्रान्तिरात्मनि ।

अतो मनसि शान्तत्वं सर्वदुःखपरिक्षयः ।। ५३

सफलता फलते भुवि कर्मणां

प्रकटतां किल गच्छति उत्तमाम् ।

स्फुटविचारदृशैव विचारिता

शमवते भवते च विरोचताम् ।। ५४

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये मुमुक्षुव्यवहारप्रकरणे विचारनिरूपणं नाम चतुर्दशः सर्गः ।। १४ ।।